Topic 78

## अञ्चु शब्द

पादः पत् ।

पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेशः । सुपदः । सुपदा । सुपाद्भ्याम् ।

अग्निमत्, अग्निमथ् । अग्निमथौ । अग्निमथः

अनिदितां हल उपधायाः क्ङिति ।

हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः किति ङिति । नुम् । संयोगान्तस्य लोपः । नस्य कुत्वेन ङः । प्राङ्, प्राञ्चौ, प्राञ्चः

अचः ।

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात् ।

चौ ।

लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः ।
प्राचः । प्राचा । प्राग्भ्याम् । प्रत्यङ् । प्रत्यञ्चौ ।
प्रतीचः । प्रत्यग्भ्याम् ।

उदङ्, उदञ्चौ ।

उद ईत् ।

उच्छब्दात्परस्य लुप्तनकाराञ्चतेर्भस्याकारस्य ईत् । उदीचः । उदीचा । उदग्भ्याम् ।

समः समि ।

अप्रत्ययान्तेऽञ्चतौ । सम्यङ् । सम्यञ्चौ । समीचः । सम्यग्भ्याम् ।

सहस्य सध्रिः ।
तथा । सध्र्यङ् ।

तिरसस्तिर्यलोपे ।

अलुप्ताकारेऽञ्चतौ व प्रत्ययान्ते तिरसस्तिर्यादेशः
तिर्यङ् । तिर्यञ्चौ । तिर्यञ्चः । तिर्यग्भ्याम् ।

नाञ्चेः पूजायाम् ।

पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न । प्राङ् ।
प्राञ्चौ । नलोपाभावाद् 'अ' लोपः न - प्राञ्चः
प्राङ्भ्याम् । प्राङ्क्षु । एवं पूजार्थे प्रत्यङ्ङादयः ।

कुङ् । कुञ्चौ । कुङ्भ्याम् ।
पयोमुक्, पयोमुग् । पयोमुचौ । पयोमुग्भ्याम् ।
उगित्वान्नुम ।

सम्बुद्धिभिन्न सर्वनाम स्थान परे होने पर सकारान्त संयोग के तथा महत् शब्द के नकार की उपधा के स्थान पर दीर्घ आदेश होता है। उदाहरण के लिए महन्त् + स् में सम्बुद्धिभिन्न सर्वनाम स्थान परे होने के कारण 'महत्' के अवयव नकार की उपधा - हकारोत्तरवर्ती अकार को दीर्घ आकार होकर महान् त् + स् रूप बनेगा। फिर सुलोप और संयोगान्तलोप होकर 'महान्' रूप सिद्ध होता है। सकारान्त संयोग की नकारान्त उपधा को दीर्घ करने के उदाहरण । विद्वांसौ (यशांसि आदि में मिलते हैं।